योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः २८

अष्टाविंशः सर्गः २८

श्रीवसिष्ठ उवाच ।

अथ ते दानवास्तत्र बलेरनुचरास्तदा ।

तद्गेहं स्फाटिकं सौधमुच्चैरारुरुहुः क्षणात् ।। १

डिम्भाद्या मन्त्रिणो धीराः सामन्ताः कुमुदादयः ।

सुराद्याश्चैव राजानो वृत्ताद्या बलहारिणः ।। २

हयग्रीवादयः सैन्याश्चाक्राजाद्याश्च बान्धवाः ।

लड्डुकाद्याश्च सुहृदो वलूकाद्याश्च लालकाः ।। ३

कुबेरयमशक्राद्या उपायनकराः सुराः ।

यक्षविद्याधरा नागाः सेवावसरकाङ्क्षिणः ।। ४

रम्भातिलोत्तमाद्याश्च चामरिण्यो वराङ्गनाः ।

सागराः सरितः शैला दिशश्च विदिशस्तथा ।। ५

सेवार्थमाययुस्तस्य तं प्रदेशं तदा बलेः ।

अन्ये च बहवः सिद्धास्त्रैलोक्योदरवासिनः ।। ६

ध्यानमौनसमाधिस्थं चित्रार्पितमिवाचलम् ।

नमत्किरीटावलयो ददृशुर्बलिमादृताः ।। ७

तं दृष्ट्वा कृतकर्तव्यप्रणामास्ते महासुराः ।

विषादविस्मयानन्दभयमन्थरतां ययुः ।। ८

मन्त्रिणः प्रविचार्यात्र किं प्राप्तमिति दानवाः ।

भार्गवं चिन्तयामासुर्गुरुं सर्वविदांवरम् ।। ९

चिन्तनानन्तरं दैत्या भार्गवं भास्वरं वपुः ।
ददृशुः कल्पितं प्राप्तं गन्धर्वनगरं यथा ।। १०
पूज्यमानोऽसुरगणैर्निविष्टो गुरुविष्टरे ।
ददर्श ध्यानमौनस्थं भार्गवो दानवेश्वरम् ।। ११
विश्रम्य स क्षणमिव प्रेमवानवलोक्य च ।
बलिं विचारयन्दृष्ट्वा परिक्षीणभवभ्रमम् ।। १२
देहरश्मिशतैर्दत्तदीप्तिभिः क्षीरसागरम् ।
क्षिपन्निव सभामाह हसन्वाक्यमिदं गुरुः ।। १३

अतिमात्रमिदं दैत्याः स्वविचारणयैव यत् ।
संप्राप्तविमलावासः सिद्धोऽयं भगवान्बलिः ।। १४
अयं तदेवमेवेह तिष्ठन्दानवसत्तमाः ।
स्वात्मनि स्थितिमाप्नोतु पदं पश्यत्वनामयम् ।। १५
श्रान्तो विश्राममायातः क्षीणचित्तभवभ्रमः ।
शान्तसंसारनीहारो वाचनीयो न दानवाः ।। १६
स्व एवालोक एतेन संप्राप्तोऽज्ञानसंकटे ।
शान्तेऽत्र संभ्रमे सौरो दिनेनेव करोत्करः ।। १७
स्वयमेव हि कालेन प्रबोधमयमेष्यति ।
बीजकोशात्स्वसंवित्त्या सुप्तमूर्तिरिवांकुरः ।। १८
कुरुध्वं स्वामिकार्याणि सर्वे दानवनायकाः ।
बलिर्वर्षसहस्रेण समाधेर्बोधमेष्यति ।। १९
इत्युक्ता गुरुणा तत्र हर्षामर्षविषादजाम् ।
दैत्याश्चिन्तां जहुः शुष्कां मञ्जरीमिव पादपाः ।। २०
वैरोचनिसभासंस्थां विधाय प्राग्व्यवस्थया ।
स्वव्यापारपरास्तस्थुः सर्वं एवासुरास्ततः ।। २१
नरा मही महिपतयो रसातलं

ग्रहा नभस्त्रिदशगणास्त्रिविष्टपम् ।

दिशोऽद्रयो दिक्पतयश्च कंदरा-

न्वनेचरा गगनचराश्च खं ययुः ।। २२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे बलिसमाधानवर्णनं नामाष्टाविंशः सर्गः ।। २८ ।।